ततोऽभ्यस्येत्प्रयत्नेन सदाचारं सदा द्विजः । तीर्थान्यभिलषन्ति सदाचारसमागमम्" इति । प्रशस्य "रजनीप्रान्त्ययामार्द्धं ब्राह्मः समयउच्यते । स्वहितं चिन्तयेत्प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा । गजास्य संस्मरेदादौ ततश्चैवं सहाम्बया । श्रीकान्तं श्रीसमेतं तु ब्रह्माख्या कमलोद्भवम् इन्द्रादीन् सकलान्देवान् वशिष्ठादीन् मुनीनपि । गङ्गाद्याः सरितः सर्वाः श्रीशैलाद्यखिलान् गिरीन् । क्षीरोदादीन् समुद्रांश्च मानसादिसरांसि च । वनानि नन्दनादीनि धेनूः । कामदुघादिकाः । कल्पवृक्षादिवृक्षांश्च धातून् काञ्चनसुखतः । दिव्याः स्त्रीरूर्वशीमुख्या गरुडादीन् पतत्त्रिणः । नागांश्च शेषप्रमुखान् गजानैरवतादिकान् । अश्वानुच्चैःश्रवान् मुख्यान् कौस्तुभादीन् मणीन् शुभान् । स्वरेदरुन्धतीमुख्याः पतिव्रतवतीर्वधूः । नैमिषादीन्यरण्यानि पुरीः काशीपुरीमुखाः । विश्वेशादीनि लिङ्गानि वेदानृक्प्रमुखानपि । गायत्रीप्रमुखान् मन्त्रान् योगिनः सनकादिकान् । प्रणवादि महाबीजं नारदादींश्च वैष्णवान् । शिवभक्तांश्च बाणादीन् प्रह्लादादीन् दृढव्रतान् । वदान्यांश्च दधीच्यादीन् हरिश्चन्द्रादिभूपतीन् । जननीचरणौ स्तुत्वा सर्वतीर्थोत्तमोत्तमौ । पितरं च गुरूंश्चापि हृदि ध्यात्वा प्रसन्नधीः । ततश्चावश्यकं कर्त्तुं नैर्ऋतीं दिशमाश्रयेत् । क्रमाद्धनुःशतं गच्छेन्नगराच्च चतुर्गुणम् । तृणैराच्छाद्य वसुधां शिरः प्रच्छाद्य वाससा । कर्णोपवीत्युदग्वक्त्रो दिवसे सन्ध्ययोरपि । विण्मूत्रे विसृजेन्मौनी निशायां दक्षिणामुखः । न तिष्ठन्नाम्भु नोविप्रगोवह्न्यनिलसंमुखः । न फालकृष्टे भूभागे न रथ्यासेव्यभूतले । नालोकयेद्दिशोभागान् ज्योतिश्चक्रं नभोऽमलम् । वामेन पाणिना लिङ्गं धृत्वोत्तिष्ठेत् प्रयत्नवान् । अथो मृदं समादत्ते जन्तुकर्करवर्जिताम् । विहाय मूषिकोत्खातां शौचोच्छिष्टाच्च नाकुलाम् । गुह्ये दद्यान्मृदश्चैकां पायौ पञ्चाम्बुसान्तराः । दश वामकरे चापि सप्त पाणिद्वये मृदः । एकैकां पादयोर्दद्यात्तिस्रः पार्ष्ण्योर्मृदः स्मृताः । इत्थं शौचं गृही कुर्याद्गन्धलेपक्षयावधि । क्रमाद्द्विगुणमेतत्स्याद्ब्रह्मचार्यादिषु त्रिषु । दिवा विहितशौचानां रात्रावर्द्धं समाचरेत् । रात्र्यर्द्धं च तदर्द्धं च पथि चौरादिगर्हिते । तदर्द्धं योषितां सुस्थे नूनं चातो न कारयेत् । अपि सर्वैर्नदीतोयैर्मृत्कूटैश्चापि गोमयैः । आपादमाचरन् शौचं भावदुष्टो न शुद्धिभाक् । अर्द्धधात्रीफलोन्माना मृदः शौचे प्रकीर्त्तिताः । सर्वाश्चाऽऽततयोऽप्येवं त्रासाच्चान्द्रायणेऽपि च" ततः आचमनप्रकारोऽभिहितः स च ६२८ पृष्ठे दर्शिताः । "अथो मुखं विशुद्ध्यर्थं गण्डूषीयाद्दन्तधावनम् । आचान्तोऽथ शुचिर्यस्मादकृत्वा दन्तधावनम् । प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे । दन्तानां काष्ठसंयोगे दहत्यासप्तमं कुलम् । अलाभे दन्तकाष्ठानां निषिद्धेऽह्यथ वासरे । गण्डूषा द्वादश प्राह्या मुखस्य परिशुद्धये । कनिष्ठाग्रपरिमाणसत्वचं निर्व्रणं दृढम् । द्वादशाङ्गुलमानञ्च साग्रं स्याद्दन्तधावनम् । एकैकाङ्गुलिह्रासेन वर्षेष्वन्येषु तूदितम् । आस्याम्लातकधात्रीजम्बूकोठखदिरोद्भवम् । अश्वत्थापामार्गखर्जूरीशेलुश्रीपर्णिपीलुजम् । राजादनं च नारङ्गं कषायं कटुकण्टकम् । क्षीरवृक्षोद्भवं वापि प्रशस्तं दन्तधावनम् । जिह्वोल्लेखनिकां वापि कुर्याच्चापाक्तितिं शुभाम् । "अन्नाद्याय व्यूहध्वं सोमोराजायमागमत् । स मे सुखं प्रमार्ष्टु यशसा च भगेन च । आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च तन्नो धेहि वनस्पते" । । मन्त्रावेतौ समुच्चार्य्य यः कुर्याद्दन्तधावनम् । वनस्पतिगतः सोमस्तस्य नित्यं प्रसीदति । मुखे पर्य्युषिते यस्माद्भवेच्च शुद्धिभाङ्नरः । ततः कुर्यात्प्रयत्नेन शुद्ध्यर्थं दन्तधावनम् । उपवासेऽपि नो दुष्येद्दन्तधावनममङ्गलम् । गन्धालङ्कारसद्वस्त्रपुष्पमाल्यानुलेपनम् । प्रातः सन्ध्यां ततः कुर्याद्दन्तधावनपूर्विकाम् । प्रातः स्नानं चरित्वाथ शुद्धेतीर्थे विशेषतः । प्रातः स्नानाद्यतः शुद्धेरत्कायोऽयं मलिनः सदा । छिद्रितो नवभिश्छिद्रैः स्रवत्येष दिवानिशम् । उत्साहमेधासौभाग्यरूपसंपत्प्रवर्त्तकम् । मनःप्रसत्तताहेतुः प्रातः स्नानं विशिष्यते । प्रस्वेदलालाद्याक्तिन्नो निद्राधीनोयतोनरः । प्रातः स्नानात्ततोऽहेः स्यान्मन्त्रस्तोत्रजपादिषु । प्रातः प्रातस्तु यत् स्नानं संजाते चारुणोदये । प्राजापत्यसमं प्राहुस्तन्महाघविघातकृत् । प्रातः स्नानं हरेत्पापमलक्ष्मीं ग्लानिमेव च । अशुद्धित्वञ्च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति । नोपसर्पन्ति वै दुष्टाः प्रातः स्नायिजनं क्वचित् । दृष्टादृष्टफलं तस्मात्प्रातः स्नानं समाचरेत्" । अन्यत्राध्याये च "अथवा प्रातरुत्थाय कृत्वावश्यकमेव च । शौचाचमनमाधाय भक्त्येद्दन्तधावनम् । विशोध्य सर्वगात्राणि प्रातः सन्ध्यां समाचरेत् । वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च । अध्यापयेच्छुचीन् शिष्यान् हितमेधा समन्वितात् । उपेयादीश्वरं चापि योगक्षेमार्थसिद्धये । ततो मध्याह्नसिद्ध्यर्थं पूर्व्वोक्तं स्नानमाचरेत् । स्नात्वा माध्याह्निकीं सन्ध्यामुपासीत विचक्षणः । देवतां परिपूज्याथ